Daily Prayers

Hindu Community Center

156 Schuyler Avenue, Kearny, NJ - 07032 Phone: 201-997-5556
1 Gaston Avenue, Garfield, NJ - 07026   Phone: 973-546-7331

अनुक्रमणिका

- द्वादश ज्योतिर्लिङ्गानि..१
- शिवमानसपूजा..२
- शिव महिम्न स्तोत्रम्...३
- नर्मदाष्टकम्...९
- शभूं शरणे पडी...११
- अम्बे माँ की आरती और ॐ जय जगदीश हरे आरती.......................१२
- अम्बे माँ की स्तुति...१४
- आद्यशक्ति अम्बे माँ की आरती...१६
- विश्वंभरी स्तुति...१८
- दुर्गा सप्तशति (शक्रादय स्तुति)..१९



शिव पूजन

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञ विभुषिताय गौरीसुताय गणनाथ नमो नमस्ते॥

मनोजवं मारुततुल्यवेगम् । जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यम् । श्रीरामदूतं शरणं प्रपद्ये ॥

वसुदेव सुतं देवं कंस चाणूरमर्दनम् ।
देवकी परमानंदं कृष्णं वंदे जगद्गुरुम् ॥

शांताकारं भुजगशयनं पद्मनाभं सुरेशं । विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यम् । वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥

द्वादश ज्योतिर्लिंगानि

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥

परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥

वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुश्मेशं च शिवालये ॥

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥

श्री शिवमानस पूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ १॥

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलम्
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ४॥

करचरण कृतं वाक्कायजं कर्मजं वा ।
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व ।
जय जय करुणाब्धे श्रीमहादेवशम्भो ॥ ५॥

॥ इति श्रीमच्छङ्कराचार्यविरचिता शिवमानसपूजा समाप्ता ॥

गजाननं भूतगणादिसेवितं कपित्थजंबूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ॥

शिव महिम्न स्तोत्रम्

श्री पुष्पदन्त उवाच

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १॥

अतीतः पंथानं तव च महिमा वाङ्मनसयोः
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २॥

मधुस्फीता वाचः परमममृतं निर्मितवतः
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तु व्यस्तं तिस्रुषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसर दुःस्थो हतधियः
कुतर्कोऽयं कांश्चित् मुखरयति मोहाय जगतः ॥ ५॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगता
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६॥

त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिल नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८॥

ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याऽध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९॥

तवैश्वर्यं यत्नाद् यदुपरि विरिञ्चिर्हरिरधः
परिच्छेतुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धा-भरगुरु-गृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १०॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत-रणकण्डू-परवशान् ।
शिरःपद्मश्रेणी-रचितचरणाम्भोरुह-बलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११॥

अमुष्य त्वत्सेवा-समधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्यापातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥ १२॥

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती
मधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः ।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयोः
न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३॥

अकाण्ड-ब्रह्माण्ड-क्षयचकित-देवासुरकृपा
विधेयस्याऽऽसीद् यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवन-भय- भङ्ग- व्यसनिनः ॥ १४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥ १५॥

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद् भुज-परिघ-रुग्ण-ग्रह- गणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृत-जटा-ताडित-तटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६॥

वियद्व्यापी तारा-गण-गुणित-फेनोद्गम-रुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥ १७॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथ-चरण-पाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बर विधिर्
विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८॥

हरिस्ते साहस्रं कमल बलिमाधाय पदयोः
यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ १९॥

क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदान-प्रतिभुवं
श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ॥ २०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतां
ऋषीणामार्त्विज्यं शरणद सदस्याः सुर-गणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफल-विधान-व्यसनिनो
ध्रुवं कर्तुं श्रद्धा विधुरमभिचाराय हि मखाः ॥ २१॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद् भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२॥

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरत-देहार्ध-घटना
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ २३॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराः
श्चिता-भस्मालेपः स्रगपि नृकरोटी-परिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि ॥ २४॥

मनः प्रत्यक् चित्ते सविधमविधायात्त-मरुतः
प्रहृष्यद्रोमाणः प्रमद-सलिलोत्सङ्गति-दृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥ २५॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः
त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत् त्वं न भवसि ॥ २६॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं-व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ २७॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहान्
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मैधाम्ने प्रणिहित-नमस्योऽस्मि भवते ॥ २८॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमतिसर्वाय च नमः ॥ २९॥

बहल-रजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबल-तमसे तत् संहारे हराय नमो नमः ।
जन-सुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३०॥

कृश-परिणति-चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुण-सीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्य-पुष्पोपहारम् ॥ ३१॥

असित-गिरि-समं स्यात् कज्जलं सिन्धु-पात्रे
सुर-तरुवर-शाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥ ३२॥

असुर-सुर-मुनीन्द्रैरर्चितस्येन्दु-मौलेः
ग्रथित-गुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकल-गण-वरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ३३॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्ध-चित्तः पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतर-धनायुः पुत्रवान् कीर्तिमांश्च ॥ ३४॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥ ३५॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तव पाठस्य कलां नार्हन्ति षोडशीम् ॥ ३६॥

कुसुमदशन-नामा सर्व-गन्धर्व-राजः
शशिधरवर-मौलेर्देवदेवस्य दासः ।
स खलु निज-महिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्य-दिव्यं महिम्नः ॥ ३७॥

सुरवरमुनिपूज्य स्वर्ग-मोक्षैक-हेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्य-चेताः ।
व्रजति शिव-समीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३८॥

श्री पुष्पदन्त-मुख-पङ्कज-निर्गतेन
स्तोत्रेण किल्बिष-हरेण हर-प्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥ ३९॥

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्कर-पादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥ ४०॥

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥ ४१॥

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्वपाप-विनिर्मुक्तः शिव लोके महीयते ॥ ४२॥

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्व-भाषितम् ।
अनौपम्यं मनोहारि सर्वमीश्वरवर्णनम् ॥ ४३॥

इति श्री पुष्पदन्त विरचितं शिवमहिम्नः स्तोत्रं सम्पूर्णम् ॥

नर्मदाष्टकम्

सबिन्दुसिन्धुसुस्खलत्तरङ्गभङ्गरञ्जितं
द्विषत्सु पापजातजातकारिवारिसंयुतम् ।
कृतान्तदूतकालभूतभीतिहारिवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ १॥

त्वदम्बुलीनदीनमीनदिव्यसम्प्रदायकं
कलौ मलौघभारहारिसर्वतीर्थनायकम् ।
सुमच्छकच्छनक्रचक्रचक्रवाकशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ २॥

महागभीरनीरपूरपापधूतभूतलं
ध्वनत्समस्तपातकारिदारितापदाचलम् ।
जगल्लये महाभये मृकण्डुसूनुहर्म्यदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ३ ॥

गतं तदैव मे भयं त्वदम्बु वीक्षितं यदा
मृकण्डुसूनुशौनकासुरारिसेवि सर्वदा ।
पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ४॥

अलक्ष्यलक्षकिन्नरामरासुरादिपूजितं
सुलक्षनीरतीरधीरपक्षिलक्षकूजितम् ।
वसिष्ठशिष्टपिप्पलादिकर्दमादिशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ५॥

सनत्कुमारनाचिकेतकश्यपात्रिषट्पदैः
धृतं स्वकीयमानसेषु नारदादिषट्पदैः ।
रवीन्दुरन्तिदेवदेवराजकर्मशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ६॥

अलक्षलक्षलक्षपापलक्षसारसायुधं
ततस्तु जीवजन्तुतन्तुभुक्तिमुक्तिदायकम् ।
विरिञ्चिविष्णुशंकरस्वकीयधामवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ७॥

अहो धृतं स्वनं श्रुतं महेशकेशजातटे
किरातसूतबाडबेषु पण्डिते शठे नटे ।
दुरन्तपापतापहारि सर्वजन्तुशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ८॥

इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा
पठन्ति ते निरन्तरं न यान्ति दुर्गतिं कदा ।
सुलभ्यदेहदुर्लभं महेशधामगौरवं
पुनर्भवा नरा न वै विलोकयन्ति रौरवम् ॥ ९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ नर्मदाष्टकं सम्पूर्णम् ॥

शभूं शरणे पडी

शभूं शरणे पडी मांगू घडी रे घडी कष्ट कापो, दया करी दर्शन शिव आपो (२)

तमे भक्तोना दुख हरनारा, शुभ सौनु सदा करनारा
हुं तो मंद मति, तारी अकळ गति, कष्ट कापो...दया करी दर्शन शिव आपो

अंगे भस्म श्मशानानी चोळी, संगे राखो सदा भूत टोळी
भाले तिलक कर्यु, कंठे विष धर्यु, अमृत आपो...दया करी दर्शन शिव आपो

नेति नेति ज्यां वेद कहे छे, मारूं चितडुं त्यां जावा चाहे छे
सारा जग मां छे तुं, वसुं तारामां हुं, शक्ति आपो...दया करी दर्शन शिव आपो

हुं तो एकल पंथी प्रवासी, छतां आतमा केम उदासी
थाक्यो मथी रे मथी, कारण जडतुं नथी, समजण आपो...दया करी दर्शन शिव आपो

आपो द्द्ष्टि मां तेज अनोखुं, सारी सृष्टिमां शिवरूप देखुं
मारा मनमां वसो, हैये आवी हसो, शांति स्थापो...दया करी दर्शन शिव आपो

भोळा शंकर भवदुख कापो, नित्य सेवानुं शुभ धन आपो
टाळो मान मदा, गाळो गर्व सदा, भक्ति आपो...दया करी दर्शन शिव आपो

अंगे शोभे छे रुद्र नी माळा, कंठे लटके छे भोरिंग काळा
तमे उमियापति अमने आपो मति, कष्ट कापो...दया करी दर्शन शिव आपो

अम्बे माँ की आरती

जय अंबे मैया मा जय अंबे मैया
वंदन करीये तुझने (२) पार करो नैया...ॐ जय अंबे मैया

दुर्बुद्धि ने दूर करी मा सद्बुद्धि आपो, मा सद्बुद्धि आपो
शरणे राखी अमने (२) संकट सौ कापो...ॐ जय अंबे मैया

सचराचर मां व्याप तमारो जननी जगदंबा, मा जननी जगदंबा
भक्तो हरनीश मांगे (२) चरणो नी सेवा...ॐ जय अंबे मैया

ॐ जय जगदीश हरे

ॐ जय जगदीश हरे, स्वामी जय जगदीश हरे
भक्तजनों के संकट, दासजनों के संकट, क्षणमें दूर करे...ॐ जय जगदीश हरे

जो ध्यावे फल पावे, दुःख बिनसे मन का, स्वामी दुःख बिनसे मन का
सुख सम्पति घर आवे, सुख सम्पति घर आवे, कष्ट मिटे तन का...ॐ जय जगदीश हरे

मात-पिता तुम मेरे, शरण गहूं मैं किसकी, स्वामी शरण गहूं मैं किसकी
तुम बिन और न दूजा, प्रभु बिन और न दूजा, आस करूं मैं जिसकी...ॐ जय जगदीश हरे

तुम पूरण परमात्मा, तुम अन्तर्यामी, स्वामी तुम अन्तर्यामी
परब्रह्म परमेश्वर, परब्रह्म परमेश्वर, तुम सब के स्वामी...ॐ जय जगदीश हरे

तुम करुणा के सागर, तुम पालनकर्ता, स्वामी तुम पालनकर्ता
मैं मूरख फलकामी मैं सेवक तुम स्वामी, कृपा करो भर्ता...ॐ जय जगदीश हरे

तुम हो एक अगोचर, सबके प्राणपति, स्वामी सबके प्राणपति
किस विधि मिलूं दयामय, किस विधि मिलूं दयामय, तुमको मैं कुमति...ॐ जय जगदीश हरे

दीन-बन्धु दुःख-हर्ता, ठाकुर तुम मेरे, स्वामी रक्षक तुम मेरे
अपने हाथ उठाओ, अपने हाथ उठाओ, द्वार पड़ा तेरे...ॐ जय जगदीश हरे

विषय-विकार मिटाओ, पाप हरो देवा, स्वामी पाप हरो देवा
श्रद्धा भक्ति बढ़ाओ, श्रद्धा भक्ति बढ़ाओ, सन्तन की सेवा...ॐ जय जगदीश हरे

तन मन धन सब कुछ है तेरा, स्वामी सब कुछ है तेरा
तेरा तुझको अर्पण, क्या लागे मेरा...ॐ जय जगदीश हरे

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

मङ्गलम् भगवान विष्णुः मङ्गलम् गरुडध्वजः।
मङ्गलम् पुण्डरी काक्षः मङ्गलाय तनो हरिः॥

सर्व मंगल मांगल्ये शिवे सर्वार्थ साधिके । शरण्ये त्र्यंबके गौरी नारायणी नमोस्तुते ॥

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणापदे पदे ॥

सोने की छडी.. रूपे की मशाल.. जरियन की साडी.. मोतीयों की माला
गौ ब्राह्मण पति पाळ.. श्री राज राजेश्वरी जगदम्बे माँ ने घणी खम्मा.. घणी खम्मा हो.

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः ॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातंगी विजय जया भगवती देवी शिवा शाम्भवी
शक्तिः शंकर वल्लभा त्रिनयना वाग्वाहिनी भैरवी
ह्रींकारी त्रिपुरा परा परमयी माता कुमारेश्वरी

त्वमेव माता च पिता त्वमेव । त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव । त्वमेव सर्वं मम देवदेव ॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥
ॐ राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान्कामकामाय मह्यम् कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय महाराजाय नमः ॥ ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं
पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समंतपर्यायी स्यात्सार्वभौमः सार्वायुष
आंतादापरार्धात्पृथिव्यै समुद्रपर्यंताया एकराळिति । तदप्येषः श्लोकोऽभिगीतो । मरुतः
परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति ॥

ॐ एकदंताय विद्महे वक्रतुँडाय धीमहि तन्नो दंती प्रचोदयात् ॥
ॐ अंजनीगर्भ संभूताय विद्महे वायुपुत्राय धीमहि तन्नो हनुमंत प्रचोदयात् ॥
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥
ॐ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ॥
ॐ महादेव्यै च विद्महे सर्व शक्तैय च धीमहि तन्नो दुर्गा प्रचोदयात् ॥

अम्बे माँ की स्तुति

स्थळ स्थळ महीं तुझ वास हो, पळ पळ सदा तुं जागती
दिन रात तारा भक्तोनी संभाळ मा तुं राखती
तुं कष्ट कापे भक्तोना, वळी साचवे तारा गणी
श्री मात अंबा आद्यशक्ति पतितपावन ईश्वरी, मा पतितपावन ईश्वरी

तें जन्म वखते जाळव्या, बाळापणे रक्षा करी
मोटा कर्यां तें बाळ सर्वे कष्ट सारा परहरी
उपकार तें अगणित कर्या वाळी शकुं ना हुं जरी
श्री मात अंबा आद्यशक्ति पतितपावन ईश्वरी, मा पतितपावन ईश्वरी

जग-मोहना वंटोळ मां हुं भान भुल्यो भूलथी
दोषो बधा मुझ टाळजो मा तेजने त्रिशूलथी
सदज्ञान भक्ति भावना देजो भरी मुझमां जरी
श्री मात अंबा आद्यशक्ति पतितपावन ईश्वरी, मा पतितपावन ईश्वरी

स्थळ स्थळ महीं तुझ वास हो, पळ पळ सदा तुं जागती
दिन रात तारा भक्तोनी संभाळ मा तुं राखती
तुं कष्ट कापे भक्तोना, वळी साचवे तारा गणी
श्री मात अंबा आद्यशक्ति पतित पावनईश्वरी, मा पतितपावन ईश्वरी

त्वमेव माता च पिता त्वमेव । त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव । त्वमेव सर्वं मम देवदेव ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यद् सकलं परस्मै नारायणायेति समर्पयामि ॥

आवाहनं न जानामि न जानामि तवार्चनमं ।
पूजां चैव न जानमि क्षमस्व परमेश्वरी ॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरी ।
यत्पूजितं मया देवी परिपूर्णं तदस्तु मे ।

गतं पापं गतं दुःखं गतं दारिद्रमेव च ।
आगता सुखसम्पत्तिः पुण्याच्च तव दर्शनात् ॥

मस्तमो पातकी नास्ति पापघ्नीत्वत्समा नहि ।
एवं ज्ञात्वा महादेवी यथा योग्यं स्तथा कुरु ॥

ओङ्कारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः । कामदं मोक्षदं चैव ओङ्काराय नमो नमः ॥

श्री आद्यशक्ति अंबे मात की जय, श्री गजानन गणपति महाराज की जय
श्री हनुमानजी महाराज की जय, श्री उमापति महादेव की जय
श्री बालकृष्ण लाल की जय, श्री रामचंद्र भगवान की जय
श्री द्वारिकाधीश की जय, श्री लक्ष्मीनारायण भगवान की जय
श्री वेदमाता गायत्री मात की जय

धर्म की जय हो, अधर्म का नाश हो, प्राणियो मैं सदभावना हो,
विश्व का कल्याण हो, गौ मैया की जय हो, भारत माता की जय हो,
सनातन धर्म की जय हो,
अपने अपने गुरुदेव की जय हो, अपने अपने ईष्ट देव की जय हो,
अपने अपने मात पिता की जय हो,
सब सन्तन की जय हो, सब तीर्थन की जय हो, सब भक्तन की जय हो,
आज के आनंद की जय हो, ओम नमः पार्वती पतये हर हर महादेव हर

आद्यशक्ति अंबा माताजी की आरती

जय आद्या शक्ति मा जय आद्या शक्ति
अखंड ब्रह्मांड दीपाव्या, पडवे प्रगटया मा...ओम जयो जयो मा जगदंबे

द्वितीया बेऊ स्वरूप शिवशक्ति जाणुं
ब्रह्मा गणपति गाए हर गाए हर मा...ओम जयो जयो मा जगदंबे

तृतीया त्रण स्वरूप त्रिभुवनमां बेठा
त्रया थकी तरवेणी तू तरवेणी मा...ओम जयो जयो मा जगदंबे

चोथे चतूरा महालक्ष्मी मा सचराचर व्याप्या
चार भुजा चौ दिशा प्रगटया दक्षिणमां...ओम जयो जयो मा जगदंबे

पंचमे पंच ऋषि पंचमी गुण पद्मा
पंच तत्व त्यां सोहिये पंचे तत्वोमां...ओम जयो जयो मा जगदंबे

षष्ठी तुं नारायाणी महिसासुर मार्यो
नर नारीना रूपे व्याप्या सर्वे मा...ओम जयो जयो मा जगदंबे

सप्तमी सप्त पाताळ संध्या सावित्री
गौ गंगा गायत्री गौरी गीता मा...ओम जयो जयो मा जगदंबे

अष्टमी अष्ट भुजा आई आनंदा
सूरनर मुनिवर जन्म्या देव दैत्यो मा...ओम जयो जयो मा जगदंबे

नवमी नवकुळ नाग सेवे नवदुर्गा
नवरात्रिना पूजन शिवरात्रिना अर्चन किधां हर ब्रह्मा...ओम जयो जयो मा जगदंबे

दशमी दश अवतार जय विजया दशमी
रामे राम रमाडया रावण रोळयो मा...ओम जयो जयो मा जगदंबे

एकादशी अगियारश कत्यायनिका मा
कामदुर्गा कालिका श्यामा ने रामा...ओम जयो जयो मा जगदंबे

बारसे बाला रूप बहुचरी अंबा मा
बटुक भैरव सोहिये काल भैरव सोहिये तारा छे तुज मा...ओम जयो जयो मा जगदंबे

तेरसे तुळजा रूप तमे तारुणी माता
ब्रह्मा विष्णु सदाशिव गुण तारा गाता...ओम जयो जयो मा जगदंबे

चौदसे चौद स्वरूप चंडी चामुंडा
भाव भक्ति कंई आपो, चतुराई कंई आपो सिंहवाहीनी माता...ओम जयो जयो मा जगदंबे

पूनमे कुंभ भर्यो सांभळजो करुणा
वशिष्ठ देवे वखाण्या, मार्कंड देवे वखाण्या गाइये शुभ कविता...ओम जयो जयो मा जगदंबे

संवत सोळ सत्तावन सोळसे बाविस मा
संवत सोळे प्रगटया रेवाने तीरे मा गंगाने तीरे...ओम जयो जयो मा जगदंबे

त्रम्बावटी नगरी मा रूपावती नगरी
मा मंछावती नगरी सोळ सहस्त्र त्यां सोहिये क्षमा करो गौरी...ओम जयो जयो मा जगदंबे

शिवशक्ति नी आरती जे कोई गाशे भणे शिवानंद स्वामी सुख संपत्ति थाशे
हर कैलाशे जाशे मा अंबा दुख हरशे...ओम जयो जयो मा जगदंबे

एकमे एक स्वरूप, अंतर नव धरशो...मा अंतर नव धरशो
भोळा भवानी ने भजता, भोळा अंबे मा ने भजता, भवसागर तरशो...ओम जयो जयो मा जगदंबे

भाव न जाणुं, भक्ति न जाणुं, नव जाणुं सेवा, मा नव जाणुं सेवा
वल्लभ भट्टने आपी, चरणोनी सेवा...ओम जयो जयो मा जगदंबे

मानो मंडप लाल गुलाल, शोभा बहु सारी...मा शोभा बहु सारी
अबील उड़े आनन्दे, गुलाल उड़े आनन्दे, जय बहुचर वाळी...ओम जयो जयो मा जगदंबे

मानी चुंदडी लाल गुलाल शोभा बहु सारी...मा शोभा बहु सारी
आँगण कुक्कड़ नाचे, जय बहुचर वाळी ...ओम जयो जयो मा जगदंबे

विश्वंभरी स्तुति

विश्वंभरी अखिल विश्व तणी जनेता, विद्या धरी वदनमां वसजो विधाता;
दुर्बुद्धिने दूर करी सद्‌बुद्धि आपो, माम् पाहि ॐ भगवती भव दुख कापो.

भूलो पड़ी भवरणे भटकुं भवानी, सुझे नहि लगीर कोई दिशा जवानी;
भासे भयंकर वळी मनना उतापो, माम् पाहि ॐ भगवती भव दुख कापो.

आ रंकने उगरवा नथी कोई आरो, जन्मांध छुं जननी हुं ग्रही बाळ तारो;
ना शुं सुणो भगवती शिशुना विलापो, माम् पाहि ॐ भगवती भव दुख कापो.

मा कर्म जन्म कथनी करतां विचारू, आ सृष्टिमां तुज विना नथी कोई मारू;
कोने कहुं कठण युग तणो बळापो, माम् पाहि ॐ भगवती भव दुख कापो.

हुं काम क्रोध मद मोह थकी छकेलो, आडंबरे अति घणो मदथी बकेलो;
दोषो थकी दूषितना करी माफ़ पापो, माम् पाहि ॐ भगवती भव दुख कापो.

ना शास्त्रना श्रवणनुं पय:पान पीधुं, ना मंत्र के स्तुति कथा नथी कांई कीधुं;
श्रद्धा धरी नथी कर्या तव नाम जापो, माम् पाहि ॐ भगवती भव दुख कापो.

रे रे भवानी बहु भूल थई छे मारी, आ ज़िंदगी थई मने अतिशे अकारी;
दोषो प्रजाळी सघळा तव छाप छापो, माम् पाहि ॐ भगवती भव दुख कापो.

खाली न कोई स्थळ छे विण आप धारो, ब्रह्मांडमां अणु अणु महीं वास तारो;
शक्ति न माप गणवा अगणित मापो, माम् पाहि ॐ भगवती भव दुख कापो.

पापे प्रपंच करवा बधी रीते पूरो, खोटो खरो भगवती पण हुं तमारो;
जाड्यांधकार करी दूर सुबुद्धि आपो, माम् पाहि ॐ भगवती भव दुख कापो.

शीखे सुणे रसिक छन्द ज एक चित्ते, तेना थकी त्रिविध ताप तळे खचीते;
वाघे विशेष वळी अंब तणा प्रतापो, माम् पाहि ॐ भगवती भव दुख कापो.

श्री सद्‌गुरु शरणमां रहीने यजुं छुं, रात्रि दिने भगवती तुजने भजुं छुं;
सद्भक्त सेवक तणा परिताप छापो, माम् पाहि ॐ भगवती भव दुख कापो.

अंतर विषे अधिक उर्मि थतां भवानी, गाउं स्तुति तव बळे नमीने मृडानी;
संसारना सकळ रोग समूळ कापो, माम् पाहि ॐ भगवती भव दुख कापो.

तारा सिवाय जगमां नथी कोई मारू, साचा सागा भगवती तमने ज मानुं;
भूलुं कदापि भव पास तणा प्रसंगे, मांगु क्षमा त्रिपुरसुन्दरी आ प्रसंगे.

दुर्गा सप्तशति (शक्रादय स्तुति)

ऋषिरुवाच ॥ १॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २॥

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥ ३॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥ ४॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ५॥

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७॥

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८॥

या मुक्तिहेतुरविचन्त्यमहाव्रता त्व
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥ ९॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवी त्रयी भगवती भवभावनाय
वार्त्ता च सर्वजगतां परमार्त्ति हन्त्री ॥ १०॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११॥

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ १३॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १५॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ १६॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥ १७॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
सङ्ग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥ १९॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥ २०॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ २१॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥ २३॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ २४॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥ २६॥

खड्गशूलगदादीनि यानि चास्त्रानि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मात्रक्ष सर्वतः ॥ २७॥

ऋषिरुवाच ॥ २८॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ २९॥

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥ ३०॥

देव्युवाच ॥ ३१॥

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छतम् ॥ ३२॥

देवा उचुः ॥ ३३॥

भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ।
यदयं निहतः शत्रुरस्माकं महिषासुरः ॥ ३४॥

यदि चापि वरो देयस्त्वयाऽस्माकं महेश्वरि ।
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ ३५॥

यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ ३६॥

तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् ।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३७॥

ऋषिरुवाच ॥ ३८॥

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽत्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ ३९॥

इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४०॥

पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ ४१॥

रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व मयाऽऽख्यातं यथावत्कथयामि ते ॥ ४२॥

इति श्री मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ॥ ४॥